# महाभाष्यव्याख्यानुसारेण
## विभक्तिसूत्रविमर्शः

**डॉ.रूपलालशर्मा**
472/14 ; चिश्त-चमन,किंशनगंज,दिल्ली-110007
Gmail-dr.rooplalsharma36@gmail.com

### सारांशः

*अन्नम्भट्टः शिवरामेन्द्रसरस्वती च इति एतयोः आचार्ययोः विभक्तिविषयकचिन्तने किं साम्यं किं च वैषम्यं वर्तते ? यदि तयोः विभक्तिविषयकावधारणायां किञ्चित् वैषम्यं वर्तते तर्हि तयोः कः आधिक्येन तर्कसङ्गतं युक्तियुक्तं च प्रतिपादनं करोति ? अनेनानुषङ्गिकेन अनुशीलनेन सह अन्येषां पूर्ववर्तिनीनां परवर्तिनीनां च टीकानाम् अन्येषां वैयाकरणानां च विभक्तिविषयकसिद्धान्तानामालोचनेन विशिष्टनिष्कर्षं प्राप्तुं प्रयत्नो मया कृतः ।*

### प्रस्तावना

सर्वे जानन्ति एव यत् - शिष्टप्रयोगार्हाणां साधुशब्दानां ज्ञानं व्याकरणस्य प्रयोजनमस्ति । तत्रोक्तं **वाक्यपदीये "साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिः"**[1] । महर्षिपतञ्जलिः व्याकरणप्रयोजनस्य विस्तरेण व्याख्यां करोति तेन लिखितं यत् **"रक्षोहागमलघ्वसन्देहाः प्रयोजनम्**[2]**"** वेदानां रक्षार्थं यथास्थानं विभिक्तिपरिवर्तनाय वाच्यपरिवर्तनाय षडङ्गवेदाध्ययनम् अपि च आगमज्ञानं लोपागमवर्णविकारादीनां ज्ञानेन एव शक्यते ।

संक्षिप्तविधिना विपुलशब्दज्ञानाय संदिग्धपदानि रूपाणि वा अवगन्तुं सन्देहनिवारणाय च व्याकरणशास्त्रस्य प्रयोजनमस्ति। रक्षोहागमादि तु मुख्यप्रयोजत्वेन वर्तते गौणप्रयोजनञ्चापि तत्र निर्दिष्टं - **तेऽसुराः, दुष्टः शब्दः, यदधीतम्,यस्तु प्रयुङ्क्ते, अविद्वान्सः, विभक्तिं कुर्वन्ति, यो वा इमाम्, चत्वारि, उतत्वः, सुक्तमिव, सारस्वतीम्, दशम्यां पुत्रस्य । सुदेवो असिवरुणः**[3] इत्यादृशैः त्रयोदशप्रतीकैः साधुशब्दव्यवहारस्य समर्थनं क्रियते ।

सर्वासां विद्यानामादिप्रवक्तृरूपेण ब्रह्मैव व्याकरणशास्त्रस्याप्यादिमः प्रवक्तेति मन्यते । तत्रोच्यते शाकटायनेन ऋक्-तन्त्रे **"ब्रह्मा बृहस्पतये प्रोवाच, बृहस्पतिरिन्द्राय, इन्द्रो भरद्वाजाय, भरद्वाज ऋषिभ्य ऋषयो ब्राह्मणेभ्यः"**[4] अनेन प्रकारेण इयं ज्ञानपरम्परा अद्यावधिः प्रवर्तते ।

**मदीये** शोधप्रबन्धे मया द्वयोष्टीकयोर्विषये तुलनात्मकं समीक्षणं कृतम्। स्वीकृतटीकाद्वये **'महाभाष्य-सिद्धान्त-रत्नप्रकाशः' 'प्रदीपोद्द्योतनम्'** चेति द्वयोष्टीकयोः विषये कश्चन विचारः प्रस्तूयते। कैय्यटः **'महाभाष्य-'प्रदीपः'** इत्येमां महत्त्वपूर्णां टीकामकरोत् । महाभाष्यमुद्दिश्य कृतासु उपलब्धासु च टीकासु भर्तृहरेः 'महाभाष्यदीपिकायाः' अनन्तरं प्रदीपटीका

---

[1] वाक्यपदीयम् - 1.143
[2] महाभाष्यम्, अध्यायः 1,पादः -1,1(पश्पशाह्निकम्)
[3]महाभाष्यम्,अध्यायः 1,पादः -1,1(पश्पशाह्निकम्)
[4] ऋक्-तन्त्रम्, 1.4

एव प्राचीना समग्रा च वरिवर्ति । अद्यत्वे महाभाष्यसदृशं क्लिष्टं ग्रन्थमध्येतुं केवलं प्रदीपटीका एव नितरामुपयोगिनी वर्तते । अतः पाणिनीयसम्प्रदाये कैय्यटेन कृतः 'महाभाष्यप्रदीपः' इति महत्त्वपूर्णो वर्तते । अर्थावगमनदृष्ट्या 'प्रदीपटीकायाः' अभिप्रायावगमनं सरलं नासीत् । अतः प्रदीपटीकामाश्रित्यापि अनेकैः टीकाकारैः नैकाः टीकाः कृताः ।

**'प्रदीपोद्द्योतनम्'** भाष्यानुगामिव्याख्यानदिशि कस्यचित् सक्षममानदण्डस्येव वर्तते । कैय्यटानुगामि सर्वाङ्गीणं च व्याख्यानमेतत् वर्तते । कैय्यटस्य समग्रस्यापि व्याख्येयांशस्य निरूपणं करोति ।

अन्नम्भट्टस्य दृष्टिर्नवीनपद्धतेः पुनरनुशीलनं प्रति प्रेरयति । एतस्मादेवान्नम्भट्टस्य 'भाष्यव्याख्याने' अविस्मरणीयं योगदानं वरिवर्ति । एतस्य निरूपणशैली नैकान् परवर्तिव्याख्याकारान् प्रभावयति । एतादृशानि नैकस्थलानि दृश्यन्ते यत्र नैकटीकाकारा मौनं तिष्ठन्ति तत्रान्नम्भट्टेन स्पष्टीकृतमस्ति । तत्र चासौ मौलिकोदाहरणानि मौलिकप्रश्नोद्भावनां मौलिकपक्षं चाप्युपस्थापयति । सम्बद्धप्रसङ्गान्तरस्य स्मरणमप्येतस्य मौलिकवैशिष्ट्यं वर्तते । रत्नप्रकाशकारस्य श्रीशिवरामेन्द्रसरस्वतीयोगीन्द्रस्य शैली तु प्रौढा । महाभाष्यस्यैव व्याख्याने प्रवृत्तोऽयं पदे पदे प्रदीपं च खण्डयति । उद्द्योतनकारेणान्नमभट्टविदुषा महाभाष्यप्रदीपस्योपरि उद्द्योतननाम्नी एका विशिष्टा टीका लिखिता ।

टीकायाः व्याख्यानस्य वा काचित् परिभाषा प्रसिद्धैव वर्तते - **तद्यथा -**

**'पदच्छेदः पदार्थोक्तिर्विग्रहो वाक्ययोजना ।**
**आक्षेपश्च समाधानं व्याख्यानं षड्विधं मतम्'**[5] ।।

प्रदीपव्याख्यानक्रम उद्द्योतनकारेण श्रीमदन्नम्भट्टेन महाभाष्यरत्नप्रकाशकारेण आचार्यशिवरामेन्द्रसरस्वतिना च महाभाष्यप्रदीपमाश्रित्य पृथक् पृथक् व्याख्यानं कृतम् । व्याख्यानस्य सर्वाणि लक्षणानि तयोष्टीकयोर्व्याख्यानयोर्वा दृक्गोचराणि भवन्ति । तथा च 'उद्द्योतनटीकायां' महाभाष्यरत्नप्रकाशटीकायां च व्याख्याकाराभ्यां कैयटोक्तविषयं बोधयितुं प्रश्नसङ्गतिप्रस्तावकरूपेण विलक्षणविन्यासः कृतः । उद्द्योतनस्य महाभाष्यरत्नप्रकाशस्य च वैशिष्ट्यं निम्नाङ्कितरूपेण प्रतिपादयितुं शक्यते -

1. **मूलाभिप्रायप्रकाशनम् ।**
2. **मूलानुक्तफलनिर्देशनम् ।**
3. **प्रतिफलकथनम् ।**
4. **असिद्धान्तप्रत्याख्यानम् ।**
5. **लक्षणस्मारणम् ।**
6. **अन्वयबोधनम् ।**
7. **सूत्रार्थकथनम् ।**
8. **भ्रान्तिनिरासकवस्तूपस्थापनम् ।**
9. **उदाहरणान्तरप्रस्तुतिः ।**
10. **व्युत्पत्तिप्रदर्शनम् ।**

[5] 'पाणिनीय-धात्वधिकार-समीक्षा' (अध्यायः – 1) पृ. - 66

**11 . प्रदीपटीकां विनापि साक्षाद् भाष्यविश्लेषणम् ।**

उपर्युक्तं वैशिष्ट्यं प्रमाणयितुम् 'अनभिहिताधिकारप्रकरणस्य' प्रदीपोद्द्योतनोक्ते प्रतिसूत्रे विचार्यते । 'व्याख्यायतेऽनया इति व्याख्या' । अपरशब्दैः टीकाप्येषोच्यते । 'टीक्यते गम्यते शास्त्रार्थोऽनयेति टीका' इत्येतादृशं लक्षणं तत्रामरकोशे कृतम् ।

द्वितीयोऽध्यायस्य तृतीयपादे प्रथमेऽऽह्निके त्रयोदशसूत्राणि एव प्रदीपानुरोधेन आचार्यान्नम्भट्टेन शिवरामेन्द्रसरस्वतिना च व्याख्यातानि । तत्र यानि सूत्राण्युल्लिखितानि तान्येमानि सन्ति -

1. अनभिहिते ।[6]
2. कर्मणि द्वितीया ।[7]
3. तृतीया च होश्छन्दसि ।[8]
4. अन्तरान्तरेण युक्ते ।[9]
5. कालाध्वनोरत्यन्तसंयोगे[10] ।
6. अपवर्गे तृतीया ।[11]
7. सप्तमी पञ्चम्यौ कारकमध्ये ।[12]
8. कर्मप्रवचनीययुक्ते द्वितीया ।[13]
9. यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी ।[14]
10. गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि ।[15]
11. चतुर्थी सम्प्रदाने ।[16]
12. नमः स्वस्तिस्वाहास्वधालंवषडयोगाच्च ।[17]
13. मन्यकर्मण्यनादरे विभाषा प्राणिषु ।[18]

---

[6] अष्टाध्यायी, 2.3.1

[7] अष्टाध्यायी, 2.3.2

[8] अष्टाध्यायी, 2.3.3

[9] अष्टाध्यायी, 2.3.4

[10] अष्टाध्यायी, 2.3.5

[11] अष्टाध्यायी, 2.3.6

[12] अष्टाध्यायी, 2.3.7

[13] अष्टाध्यायी, 2.3.8

[14] अष्टाध्यायी, 2.3.9

[15] अष्टाध्यायी, 2.3.12

[16] अष्टाध्यायी, 2.3.13

[17] अष्टाध्यायी, 2.3.16

[18] अष्टाध्यायी, 2.3.17

वस्तुतः तुलनात्मकाध्ययनाय केचन मानदण्डा अपेक्षिताः। तत्र के निर्धारणबिन्दवो यानाश्रित्य तुलनात्मककार्यं स्यात ? इति जिज्ञासायां वक्तुं शक्यते - सङ्केतितमतविभेदा भवन्ति टीकाकारयोर्मध्ये।

सूत्रन्याससम्बद्धा मतभेदा भवन्ति। टीकाकारयोः पारस्परिकमतभेदविश्लेषणं स्यात्। महाभाष्यरत्नप्रकाशे, प्रदीपोद्द्योतने चोपलब्धवृत्तिकारविचारा अपि सन्ति। टीकाद्वय एव टीकाकाराभ्यां प्रयासो विहितो यत् – केवलं कैय्यटप्रदीपस्य व्याख्यानमेव तयोर्लक्ष्यं न स्यादपितु भाष्यस्य दुरूहांशानां स्वातन्त्र्येण विवेचनं स्यात्।

यद्यपि विशेषतः टीकाकारद्वयस्य मुख्यलक्ष्यं कैयटीयाशयस्याविष्करणं वर्तते तथापि यत्र तत्र स्वकल्पितयुक्तिभिः विषयपोषणेन प्रतिफलकथनेन शङ्कानिवारणेन पदच्छेदेन पदार्थनिर्वचनेन वाक्ययोजनया सङ्गतिकथनादिकैर्व्याख्यालक्षणैः स्वीयस्वतन्त्रविवेकेनापि विषयप्रतिपादनं टीकाकारद्वयेन विहितम्।

विशेषतो महाभाष्यरत्नप्रकाशकारेण तु महाभाष्यप्रतीकाः समुपस्थापिताः। तान् आश्रित्य चापि स्वतन्त्रचिन्तनं नैकस्थलेषु विहितम्।

अन्नम्भट्टः एतादृशेन वाक्येन विषयस्योपस्थापनस्यारम्भं करोति यस्य समापनं प्रायः कैयटीयवचनोपक्रमे भवति।

परन्तु रत्नप्रकाशकारस्य शिवरामेन्द्रसरस्वतिनोः विषये तथा नास्ति। तस्य क्रमो निश्चितो नास्ति यत् स प्रदीपवचनेनोपस्थापनस्यारम्भं करिष्यत्युत महाभाष्यवचनेन। अतः तस्य व्याख्याने प्रायः द्वयमपि भवति। क्वचित्तु स कैयटीयवचनेनैव विषयोपस्थापनारम्भं करोति परन्तु सर्वत्र तथा नास्ति। बहुत्र स महाभाष्यवचनप्रतीकमादायापि व्याख्यानस्यारम्भं करोति।

यथा - अनभिहिते इति सूत्रव्याख्यानक्रमे रत्नप्रकाशकारः महाभाष्यस्थवचनेन व्याख्यानस्यारम्भमकरोत्। 'अनर्थान्तरमिति' न विद्यतेऽर्थान्तरं यस्य तदित्यर्थः[19]।

उद्द्योतनकारोऽन्नम्भट्टः प्रायः तादृशीमनुपत्तिमाशङ्कां वोद्भावयति, यस्याः निवारणार्थं कैयटीयवचनमतिरिच्य किञ्चिदन्य समाधानं न भवितुं शक्नोति।

परन्तु शिवरामेन्द्रस्य व्याख्याने तथा नास्ति। तस्य स्वतन्त्रसमाधानं नैकस्थलेषु द्रष्टुं शक्यते। सः महाभाष्यकारस्यापि क्वचिद् युक्तिपूर्वकं खण्डनं कर्तुमुत्सहते।

टीकाकारद्वयस्य काश्चनान्यविशेषता याः तौ अन्यटीकारेभ्यः पृथक् कुर्वन्ति। तासु काश्चन - सः यथावसरं सम्बद्धसूत्रार्थकथनं रूपसिद्धिप्रदर्शनम्, उदाहरणप्रस्तुतिम्, शास्त्रीयलौकिकन्यायस्य तात्पर्याविष्करणार्थमाश्रयणम्, व्याख्याकाराणां मतभेदसमीक्षणम्, ज्ञापनप्रदर्शनम्, अतिदेशादिसूत्रप्रवृत्तिविचारं चापि निरूपयति।

**उदाहरणार्थं कानिचन स्थलानि पश्यामः।**

[19] महाभाष्यसिद्धान्त-रत्नप्रकाशः 2.3.1

रत्नप्रकाशकारेण आदौ **'अनभिहिते'** इति सूत्रव्याख्यानक्रमे 'अर्थान्तरमिति' पदं साक्षाद् महाभाष्यतो गृहीतः । तत्र 'बहुव्रीहिसमासः' तस्य च विग्रहो 'न विद्यतेऽर्थान्तरं यस्य तद्'[20] एतस्मादवगम्यते यद् रत्नप्रकाशकारः स्पष्टतया समासादिविषये प्रतिपादयति।

पुनश्च 'अनभिहिते' इत्यस्य व्याख्यानक्रमे स्पष्टार्थं 'चोक्तनिर्दिष्टाभिहितशब्दा एकार्थका इति'[21] ब्रूते।

रत्नप्रकाशकारो महाभाष्यव्याख्यानक्रमे सन्देहास्पदपदानां व्याख्यानेऽपि रुचिं दधाति । तद्यथा - 'यावदिति'[22] अत्र सन्देहो भवितुमर्हति स्म यत् - का विभक्तिः,किं च वचनम् ? यावदिति शब्दे , कश्चास्य पदस्यार्थः । तत्र 'यावदित्यव्यये द्वितीयैकवचनान्ते यत्तदर्थे ज्ञेये'[23] ।

रत्नप्रकाशकारेण 'ग्रन्थान्तरादपि' विषयाः स्वीकृताः क्वचित् स्वीयमतपुष्टये । तद्यथा – 'लघुशब्देन्दुशेखरे' 'पञ्चकं प्रातिपदिकार्थ इति पक्षे' 'कर्मणि द्वितीया' इत्यादिः द्व्येकयो...इत्यादेश्च नियमत्वम्'[24] इति प्रदिपादितम् । तादृश एव विषयो रत्नप्रकाशकारेण प्रकृतसूत्रव्याख्याने प्रतिपादितम् । तद्यथा - 'स्वार्थद्रव्यलिङ्गानि प्रतिपदिकार्थाः' इति पक्षे कर्मण्यभिधेये सति द्वितीया स्यादित्याद्यर्थकेन 'कर्मणि द्वितीया' इत्यादिकसूत्रेण विधीयमाना द्वितीयादिर्विभक्तिः'हरिं पश्यति'इत्यादौ लब्धावकाशाः 'कृतः कटः' इत्यादौ न भवति'[25]।

रत्नप्रकाशकारो महाभाष्येतरोदाहरणान्यपि स्वीयव्याख्याने उपस्थापयति। तद्यथा- 'द्वावपूरावानय' इत्यादौ तु 'अपूपौ'इत्यादिपदेनाभिहितेऽर्थे 'द्वौ' इत्यादिपदस्य लोके प्रयोगेऽपि न दोषः, तत्र 'द्वौ' इत्यादिर्विध्यभावादिति न काप्यनुपपत्तिः'[26]

रत्नप्रकाशकारः क्वचिद् स्पष्टव्याख्यानं न करोति यो विषयः सङ्क्षेपेणापि प्रतिपादयितुं शक्यते, तदर्थं सः दीर्घवाक्यपदावल्याः प्रयोगं करोति । तद्यथा – 'अनभिहिताधिकारशास्त्रस्य' व्याख्यानक्रमे तत्र 'प्रथमदृष्टान्तनिरसनभाष्ये' 'चित्रगुः' इति दृष्टान्त उपस्थापितः ।

पूर्वोक्तप्रसङ्गे 'रत्नप्रकाशकारः' स्पष्टतया, 'समानाधिकरण्यं नास्ति' इति साक्षाद् निषेधं कर्तुं शक्नोति स्म । यथा प्रदीपोद्द्योतनेक कैयटीये च व्याख्याने विहितम् । परन्तु रत्नप्रकाशकारः 'चित्रगुरिति' प्रतीकमादाय 'चित्रगुरित्यस्तिसमानाधिकरणयोरेव चित्रगोशब्दयोर्बहुव्रीहेर्विहित्वाद् चित्रगुशब्दादस्ति समानाधिकरण्ये प्रयुक्तो मतुब् न भवतीति भावः'[27] इत्यत्र विपुलव्याख्यानमकरोत् ।

[20] महाभाष्यरत्नप्रकाशः, अनभिहिते (2.3.1), इति सूत्रे, प्रथमाह्निके, प्रदीपव्याख्यानानि, इति ग्रन्थे

[21] महाभाष्यरत्नप्रकाशः, अनभिहिते (2.3.1), इति सूत्रे,

[22] महाभाष्यरत्नप्रकाशः, अनभिहिते (2.3.1), इति सूत्रे, प्रथमाह्निके, 'प्रदीपव्याख्यानानि' इति ग्रन्थे

[23] महाभाष्यरत्नप्रकाशः, अनभिहिते (2.3.1), इति सूत्रे, पृष्ठम्- 197

[24] लघुशब्देन्दुशेखरे 'कर्मणि द्वितीया' इति सूत्रे,पृष्ठम् -395

[25] महाभाष्यरत्नप्रकाशः, अनभिहिते (2.3.1), इति सूत्रे, पृष्ठम्- 197

[26] महाभाष्यरत्नप्रकाशः, अनभिहिते (2.3.1), इति सूत्रे, प्रथमाह्निके, 'प्रदीपव्याख्यानानि' इति ग्रन्थे, पृष्ठम् - 197

[27] महाभाष्यरत्नप्रकाशः, अनभिहिते (2.3.1), इति सूत्रे, 'प्रदीपव्याख्यानानि' पृष्ठम्- 197

रत्नप्रकाशकारः शिवरामेन्द्रसरस्वती आचार्यपाणिनिं प्रति अतीव श्रद्धावनतो दृश्यते । तद्यथा – तत्र सः कथयति ''सप्तपर्णोऽष्टापदम्' इति महाभाष्यप्रतीकमादाय यत् "प्रतीयमानवीप्सायाः समासेनोक्तत्वात् सप्ताष्टशब्दयोः 'नित्यवीप्सयोः' इति विहितं द्विर्वचनं न भवतीति भाव, तदेव'कर्मादयो विभक्त्यर्थाः' इति मतेऽनभिहिताधिकारखण्डनपरवार्त्तिकं भाष्यकृता सदृष्टान्तं सम्यगुपपादितं चेदपि 'पाणिनिपक्षपाती कश्चिन्मन्दबुद्धिः' भाष्यकृदुक्तदृष्टान्तान् यथामति विघटयति"[28]

पूर्वक्तदृष्टान्तस्य अभिप्रायोऽयं विद्यते यत् पाणिना 'अनभिहिते' इति शास्त्रस्य रचना विशिष्टप्रयोजनमनुदिश्य विहिता। यथोच्यते पारिभाषिके 'व्याख्यानतो विशेषप्रतिपत्तिर्नहि सन्देहादलक्षणम्' अतः पाणिनिशास्त्रस्य खण्डनं तु न करणीयम् । बुद्धिर्व्यायामाय चर्चा तु कर्तुं शक्यते। एतस्मात् पाणिनीयशास्त्रे शिवरामेन्द्रसरस्वतिपादस्य श्रद्धा दरीदृश्यते।

उद्द्योतनकारः 'अनभिहिते' इति सूत्रव्याख्यानक्रमे सूत्रस्यैतस्यावश्यकता कदा वर्तते । कदा शास्त्रमेतत् प्रत्याख्येयं नास्तीति विषये स्पष्टतया कैयटीयव्याख्यानुसारमेव प्रतिपादयति । तद्यथा - 'परिगणनमध्ये तिङ्ग्रहणाभावे तिङुक्तेऽपि स्यात् । तदप्यस्तीति वक्तुं 'परिगणनं च करोषि 'इति लौकिकवाक्येषु सर्वत्र क्रियैव वाक्यार्थ इति भावः'[29]।

उद्द्योतनकारः 'अनभिहिते' इति शास्त्रस्य प्रत्याख्यानसन्दर्भे, कैयटीयचिन्तनमेवानुसरति । तद्यथा - 'द्व्येकयोः'इति निर्देशस्य भावप्रधानत्वात् कर्मणा सामानाधिकरण्यासंभवाद्वैयधिकरण्येन विशेषणत्वमुपपादयितुमेकत्वस्याश्रयाश्रयिभावसम्बन्धेन सम्बन्धि यत् कर्मेत्युक्तम्। तस्मिन् पक्षे सूत्रं प्रत्याख्यातम्'।

तुलनाप्रसङ्गे वक्तुं शक्यते यदुभयत्र गौरवलाघवं समानमेव। रत्नप्रकाशकारस्योद्द्योतनकारस्य च प्रायः भिन्नाः प्रयोगाः दृश्यन्ते।

महाभाष्यरत्नप्रकाशटीकायां गौरवं क्वचिदाधिक्येन दरीदृश्यते। तद्यथा – 'कालाध्वनोरत्यन्तसंयोगे'[30] इति सूत्रे रत्नप्रकाशकारस्य व्याख्यानमुद्द्योतनस्य अपेक्षया विपुलं वर्तते।

अस्मिन् शोधप्रबन्धे मया -**'सुब्विभक्तिविधायकसूत्रभाष्यव्याख्यानयोस्तुलनात्मकमध्ययनम्'** कृतम्।

अष्टाध्याय्यां द्वितीयाध्यायस्य तृतीयपादे विभक्तिविधायकसूत्राणि वर्तन्ते। तत्रानभिहिते, इत्यधिकारसूत्रमस्ति । विभक्तिविधायक-सूत्राणामावश्यकता नितरां संस्कृते वरीवर्ति । तत्र द्वितीया, तृतीया, चतुर्थी, पञ्चमी, षष्ठी, सप्तमीत्यादीनां च विभक्तीनां विधानमस्ति।

अनभिहिताधिकारान्तर्गतोद्द्योतनरत्नप्रकाशयोरिति द्वयोष्टीकयोः शैलीविषये, द्वयोर्मध्येकस्याः उपयोगिता नितरां वरीवर्ति । एतादृशेषु विषयेष्वहं समीक्षात्मकमध्ययनं प्रकृतशोधप्रबन्धे कृतम्। क एतयोष्टीकयोर्विभक्तिविधायकप्रकरणस्योपरि कस्यापूर्वं चिन्तनं वर्तते इति विषये मयात्रोल्लिखितम्।

अस्मिन् शोधप्रबन्धे मया महाभाष्यप्रदीपमाधारीकृत्य **'प्रदीपोद्द्योतनम्' 'महाभाष्यसिद्धान्तरत्नप्रकाशः'** इति द्वयोष्टीकयोर्व्याख्यानयोर्वा तुलनात्मकं समीक्षणं विहितम्। टीकाद्वयमाधारीकृत्य मया नैके विषयाः विवेचिताः।

---

[28] महाभाष्यरत्नप्रकाशः, अनभिहिते (2.3.1), इति सूत्रे, 'प्रदीपव्याख्यानानि'पृष्ठम्- 198

[29] प्रदीपोद्द्योतनम् 2.3.1, 'प्रदीपव्याख्यानानि' पृष्ठम् - 195

[30] महाभाष्यसिद्धान्त-रत्नप्रकाशः, 2.3.5

मदीयोऽयं शोधप्रबन्धः सप्ताध्यायेषु उपनिबद्धो वर्तते । द्वयोष्टीकयोः तुलनात्मकसमीक्षणकाले न कस्यापि टीकायाः न्यूनतां प्रतिपादयितुं मदीया मतिः प्रवृत्ताभूत्, परन्तु तुलनात्मकसमीक्षणाय मया काञ्चन भिन्नताः कानिचन वैशिष्ट्यानि चावश्यमेव तत्र समीक्षितानि । 'उत्तरोत्तरं मुनीनां प्रामाण्यम्' इति तु सर्वे जानन्त्येव । तस्मात् कस्याप्याचार्यस्य न्यूनता न क्वापि वर्तते परन्तु चिन्तने भेदस्तु भवत्येव ।

मुनित्रयस्य वंशानुक्रमे तत्प्रदत्तज्ञानराशेः संरक्षत्वेन परवर्तिवैयाकरणेषु उद्द्योतनकारोऽन्नम्भट्टो रत्नप्रकाशकारश्च शिवरामेन्द्रसरस्वती चापि वर्तते ।

**निष्कर्षः**

प्रस्तुते शोधप्रबन्धे एतयोः द्वयोष्टीकाकारयोः मतानां विश्लेषणेन सहैव एतयोः टीकयोः 'अनभिहिताधिकारविषयकेषु' सूत्रेषु द्वयोः मतानामपि यथास्थानं वर्णनं कृतम् । अनभिहिताधिकार'विषयकस्य चिन्तनस्य निष्कर्षस्य च तर्कपूर्णरीत्या प्रस्तौतुं द्वयोष्टीकाकारयोः लेखनी सशक्ता प्रतीयते । अनेन प्रकारेण द्वयोरेव या दृष्टिर्विद्यते तया 'अनभिहिताधिकार'विषयकस्य प्रकरणस्य सर्वाङ्गीणो निष्कर्षः समीचीनतया प्रकटितः । अनेन प्रकारेण मदीयोऽयं शोधप्रबन्धो नूनं भाविशोधार्थिनां विशेषतया अनभिहिताधिकारप्रकरणसम्बद्धेषु विषयेषु मार्गदर्शकत्वेन भविष्यति । विभक्तिविधायकसूत्राणां विषये ये जनाः भ्रान्ता भवन्ति तेषामेकं सुस्थिरमथ च संस्कृतज्ञानपिपासुजनानां कृते विभक्तिविधायकसूत्राणां विषये सारल्यमानेतुं सामान्यसंस्कृतज्ञानसम्पादयितुञ्च मत्कार्यं सहाय्यं करिष्यतीति मे मतम् ।

*****